## स्वपिस्यमिव्येञां यङि। (१९/२६४५)

'ञिष्वप शये' (धा.पा. १०६९), 'स्यमु (धा. पा. ८२७), स्वन[1] (धा. पा. ८२८), ध्वन (धा.पा. ८२९) शब्दे, 'व्येञ् संवरणे' (धा. पा. १००८) इत्येतेषां [2]धातूनां यङि परतः सम्प्रसारणं भवति। सोषुप्यते। सेसिम्यते। वेवीयते। यङि इति किम्? [4]स्वप्नक् (३. २. १७२/३१५२)॥

## न वशः। (२०/२६४६)

यङि इति वर्तते। वशेर्धातोर्यङि परतः संप्रसारणं न भवति। वावश्यते, वावश्येते, वावश्यन्ते। यङि इति किम्? [5]उष्टः। उशन्ति॥

## चायः की। (२१/२६४७)

यङि इति वर्तते। 'चायृ पूजानिशामनयोः' (धा. पा. ८८१) [6]इत्येतस्य धातोः यङि परतः की इत्ययमादेशो भवति। चेकीयते, चेकीयेते, चेकीयन्ते। दीर्घोच्चारणं यङ्लुगर्थम्। चेकीतः॥

## स्फायः स्फी निष्ठायाम्। (२२/३०४४)

'स्फायी ओप्यायी वृद्धौ' (धा. पा. ४८७, ४८८) इत्यस्य धातोः निष्ठायां [7]परतः स्फी इत्ययमादेशो भवति। स्फीतः। स्फीतवान्। निष्ठायाम् इति किम्? स्फातिः। [8]स्फातीभवति इत्येतदपि क्तिन्नन्तस्यैव रूपं, न निष्ठान्तस्य। निष्ठायाम् इत्येतदधिक्रियते 'लिड्यङोश्च' (६. १. २९/२३२७) इति प्रागेतस्मात् सूत्रात्॥

## स्त्यः प्रपूर्वस्य। (२३/३०३३)

निष्ठायाम् इति वर्तते, संप्रसारणम् इति च। स्फी इत्येतन्न स्वर्यते। 'स्त्यै ष्टचै शब्दसंघातयोः' (धा. पा. ९११, ९१२)। द्वयोरप्येतयोः धात्वोः स्त्यारूपमापन्नयोः सामान्येन ग्रहणम्। स्त्या इत्यस्य प्रपूर्वस्य धातोर्निष्ठायां परतः सम्प्रसारणं भवति। प्रस्तीतः। प्रस्तीतवान्। सम्प्रसारणे कृते यणवत्त्वं विहतम् इति निष्ठानत्वं न भवति। 'प्रस्त्योऽन्यतरस्याम्' (८. २. ५४/ ३०३४) इति [9]तु पक्षे मकारः क्रियते। प्रस्तीमः प्रस्तीमवान्। प्रपूर्वस्य इति किम्? [10]संस्त्यानः। संस्त्यानवान्। प्रस्त्यः इत्येव सिद्धे पूर्वग्रहणमिहापि यथा स्यात्, प्रसंस्तीतः, प्रसंस्तीतवान्। तत् कथं प्रपूर्वस्य इति षष्ठ्यर्थे बहुव्रीहिः? [11]प्रः पूर्वो यस्य धातूपसर्गसमुदायस्य [12]स प्रपूर्वः तदवयवस्य स्त्यः इति व्यधिकरणे षष्ठ्यौ। तत्र प्रसंस्तीतः इत्यत्रापि [13]प्रपूर्वसमुदायावयवः स्त्याशब्दो भवति॥

---

1. स्तेये इत्यधिकम् ड. 2. धातूनाम् नास्ति ग. 3. सोसुप्यते क. ह. 4. सुपक् क. 5. उशितः उशितवान् फ. ह. 6. इत्यस्य क. फ. ह. 7. परतः नास्ति फ. 8. कथम् इत्यधिकम् ब. 9. तु नास्ति फ. 10. संस्त्यावः फ. 11. प्रशब्दः ह. 12. सोऽपि फ. 13. प्रपूर्वस्य क.